॥ ओ३म् ॥

प्रत्युत्थानं च युद्धं च
संविभागं च बन्धुषु।
स्वयमाक्रम्य भुक्तं च
शिक्षेच्चत्वारि कुक्कुटात्॥

(चाणक्य-नीति)

RNI No. : DELSAN/2011/38660 ISSN 2321-4937 DL(E)-20/5534/2018-20
Approved Journal by UGC - No 40484

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइटः www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

य एतान् विंशतिगुणाना-
चारिष्यति मानवः।
कार्यावस्थासु सर्वासु अजेयः
स भविष्यति॥

(चाणक्य-नीति)

卐 वर्षम्-८ 卐 अंकः-१३ (१८१) 卐 १ जनवरीः २०१९ तः १५ जनवरीमासः २०१९ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८


## गौतमनगरस्थितगुरुकुलस्य अष्टपञ्चाशत्वार्षिकोत्सवे नवत्रिंशत्तमचातुर्वेदब्रह्मपारायणयज्ञः सुसम्पन्नः

नवदेहली। गुरुकुले अष्टपञ्चाशततं वार्षिकोत्सवमेवं नवत्रिंशततम् चतुर्वेद परायण यज्ञ सुसम्पन्नो जातः। समारोहः दिसम्बर मास्य तृतीय दिवसे चतुर्वेदपरायणयज्ञस्यारम्भः ध्वजारोहनेनभवत्। अस्य यज्ञस्य ब्रह्मा प्रो. महावीर अग्रवाल यज्ञस्य प्रणेता स्वामीप्रणवानन्द डॉ. वेदव्रतआलोक




ठाकुरविक्रमसिंह, पूर्व. आईएएस आनन्दकुमार, डॉ. धर्मेन्द्रकुमार आदि विद्वान्सः अस्य यज्ञस्य एवं वेदस्य महत्ता विषये कथितवन्तः।

समापन समारोहः दिसम्बरमासस्य षोडश दिनाङ्केः प्रातः अष्टवादने यज्ञस्य पूर्णाहूति माध्यमेनभवत्। मंचासीन यज्ञस्य ब्रह्मा महावीरअग्रवालः स्वाद्बोधने उक्तवान यत् परमात्मा

शेषभागः द्वितीयपुटे

## गीताजयंती-महोत्सवस्य समुपलक्ष्ये संस्कृतसाहित्यस्य अन्यविषयेषु प्रभावः इति विषयाधारित-एकदिवसीय-राष्ट्रिय-संगोष्ठी

राजीवगाँधी राजकीयमहाविद्यालय साहा अम्बालायां हरियाणा संस्कृत अकादमी पंचकूला एवं संस्कृत व आंग्ल विभाग इत्यस्य संयुक्त तत्वावधाने गीताजयंती महोत्सवस्य समुपलक्ष्ये



संस्कृत साहित्यस्य अन्य विषयेषु प्रभावः विषयाधारित एकदिवसीय राष्ट्रिय संगोष्ठ्याः आयोजनमभवत्। अस्यां संगोष्ठ्यां स्थानीय विध गायिका श्रीमती संतोषसरवान मुख्यातिथि आसीत्। राष्ट्रपति सम्मानेन् सम्मानित डॉ. वेदप्रकाशउपाध्यायजी (सेवानिवृत प्रो. एवं विभा.सं.वि.पं.वि.वि.) विशिष्टातिथि मुख्यवक्ता डॉ.राधेश्यामशर्माजी (पूर्व कुलपति) प्रो.डॉ. राजेश्वर मिश्र (विभा.सं.वि.कु.वि.वि.) डॉ. मनोज मिश्राजी (प्रो.रा.सं.संस्थान) डॉ. कामदेवझाजी (प्रा.डी.ए.वी.महा.पिहोवा) आसन्। अस्यातिरिक्त डॉ.रेखाशर्माजी (प्रा.रा.महा.वि.कसाल), डॉ. कुसुमाध्याजी, डॉ. रजनीभंडारीजी,

शेषभागः द्वितीयपुटे




प्रथमपुटस्य शेषभागः

## गौतमनगरस्थितगुरुकुलस्य अष्टपञ्चाशत्....

परमपिता अस्ति। परमात्मा मनुष्यान् धर्ममार्गं प्रदर्शयति। सः विश्वं धर्मस्यमूल वेदज्ञानं दत्तवान। अस्मान् मिलित्वा तेषां गानं करणीयम्।





गोमत गुरुकुलस्याचार्य स्वामीश्रद्धानन्दः अथर्वेदस्य चर्चा समये उक्तवान यत् वेदस्योपदेशः मानवमात्रस्य कल्याणार्थमस्ति। मनुष्यस्य यशप्राप्त्यर्थं सर्वोत्तमं साधनं यज्ञोऽस्ति। तत्पश्चात् सार्वदेशिक सभायाः प्रधान स्वामी अवधेशजी महोदयस्य व्याख्यानमभवत्। स्वामी जी उक्तवान यत् मानवतायाः कल्याणस्य कार्यं यज्ञादागच्छति गोपथब्राह्मणस्यानुसारेण् 'यज्ञः श्रेष्ठतमं कर्मः'। परोपकारार्थमिदं शरीरं इति ध्यातव्यम्। सत्यस्य ग्रहणमेवं असत्यस्य परित्यागः करणीयः

अस्मिन्नवसरे आर्यप्रतिनिधि सभा उत्तरप्रदेशस्य मंत्री स्वामी धर्मेश्वरानन्दः स्वोद्बोधने उक्तवान यत् यज्ञेन् सर्वकल्याणं भवति। सः प्रणवानन्दस्य प्रशंसा कृत्वा उक्तवान् यत् तेषां मार्गदर्शनेन् कुरूकुलस्य परम्परा अखिल प्रपञ्चे प्रचरिष्यन्ति।

प्रसिद्धआर्य विद्वान डॉ. महेश विद्यालंकारः उक्तवान यत् महर्षि दयानन्दः यज्ञस्य वास्तविक स्वरूप विषये उक्तवान यज्ञस्य महिमा अद्वितीयोऽस्ति। भारतीय संस्कृति यज्ञाधारित। यज्ञेन तन-मन शुद्ध भवति। ते समाजे यज्ञस्य भावनां वर्धितुं उक्तवान।

दिल्ली आर्य प्रतिनिधि सभायाः प्रधान श्रीधर्मपाल आर्यः स्वोद्बोधने अग्निहोत्र यज्ञविषये चर्चा कृतवान। एवमुक्तवान इदानीं सर्वत्र प्रदूषणं व्याप्योऽस्ति। पर्यावरणशुद्धि एवं वायुमण्डस्य शुद्ध्यर्थं यज्ञ आवश्यकोऽस्ति।

समारोहे ठाकुरविक्रसिंहः स्वोद्बोधने उक्तवान् यत् तेषां पितामह महर्षि दयानन्दस्य वेदविषयकोपदेशः श्रुतवन्तः। महर्षि दयानन्दस्य कथनमासीत् यत् देशस्य राजानः यज्ञः करोति स्म। येन् देशः धन्य-धान्य पूर्णासीत्। श्रीसिंह उक्तवान यत् स्वतन्त्रता पश्चात् देशे चारित्रिक एवं नैतिक मूल्ये शिथिलता आगतवान। अस्मान् स्व सन्ताने वीरतारूपी संस्कारस्य प्रतिष्ठापनं कर्तव्यम्। येन् धर्म व संस्कृतेः संरक्षणं भविष्यति। समारोहं शीर्षं वैदिक विद्वान डॉ. रघुवीरवेदालंकार, डॉ.धमेन्द्रकुमारशास्त्री, श्रीवीरपाल, (स्नातकगुरूकुलकांगड़ी) डॉ. आनन्द कुमर (अमिटि वि. विद्यालयस्य संस्थापक) डॉ. अशोक चौहान अपि सम्बोधितवान। चतुर्वेदपरायण यज्ञस्य पूर्णाहूति एवं प्रवचन श्रंखलायाः समाप्यानन्तरं पं सत्यपालपथिकः यज्ञप्रार्थना कृत्वा कार्यक्रमं सफलं कृतवान।

प्रथमपुटस्य शेषभागः

## गीताजयंती-महोत्सवस्य समुपलक्ष्ये




डॉ.जितेन्द्रजी, डॉ. मंगलसिंहजी एवं संस्कृत एवं अन्या भाषायाः विद्वान्सः उपस्थिताः आसन्। डॉ. कमलेशराजीजी (प्रा.राजीवगांधी रा.महा.साहा), सगोष्ठ्याः संरक्षिका एवं डॉ. सुखबीरजी मंचसंचालकरूपे आस्ताम्। हरियाणासंस्कृतअकादम्याः निदेशक डॉ. सोमेश्वरदत्त कार्यक्रमस्याध्यक्ष रूपे आसीत्।

## उत्तरप्रदेशसंस्कृतसंस्थानस्य 15 दिवसीय-संस्कृतभाषाप्रशिक्षणवर्गः

-नूतनविष्णुरेग्मी

'उत्तरप्रदेशसंस्कृतसंस्थानम्,नवहैदराबाद,लखनउ,उत्तरप्रदेशः'इति संस्थया 29/12/2017 दिनांकतः 13/01/2019 दिनांकपर्यन्तम् 15 दिवसीय-आवासीय-संस्कृतभाषा-प्रशिक्षणवर्गः लखनउनगरस्य निशातगंजस्थ 'अतिथि-इन,होटेल एण्ड बैन्क्वेट' इत्याख्यस्थाने समायोजितः अस्ति।वर्गेऽस्मिन् प्रशिक्षुणां संख्या आहत्य118(59 पुरुषाः, 69 महिलाः च) अस्ति। एतद्वर्गनिमित्तं एते सर्वेऽपि स्वस्य पंजीकरणं 29/12/18 तमे दिनांके एवं




कारयित्वात्र प्रशिक्षणं प्राप्नुवन्तः सन्ति।वर्गे दशाधिकाः प्रशिक्षकाः सन्ति । मध्ये मध्ये विशिष्टातिथयः अपि आगत्य एतेषां मार्गदर्शनं कुर्वन्ति, करिष्यन्ति च।अत्र प्रशिक्षणं laptops,projectors,PowerPoint presentation slides माध्यमेन प्रचलदस्ति।एतेषां प्रशिक्षणोत्तरपरीक्षा साक्षात्कारश्च भविष्यति। ये तत्र उत्तीर्णतां प्राप्स्यन्ति तेषां नियोजनं अग्रे सरलसंस्कृतसंभाषणयोजनान्तर्गतं संस्कृतवाग्व्यवहारकार्यशालायाः प्रचालनाय भविष्यति।तत्र एतेभ्यः एतेषां स्तरानुगुणं निर्धारितमानदेयमपि संस्थानेन प्रदास्यते।

वर्गस्यास्य उद्घाटनसत्र जातमासीत् 30/12/2018 दिनांके प्रातः10:00 वादने।तत्र सुधीष्ठमहोदयः(प्रशिक्षणप्रमुखः)वीरेन्द्रमहोदयः(वर्गप्रबन्धकः)देवनिरंजनमहोदयः(मुख्यप्रशिक्षकः)सतीशमहोदयः(प्रशिक्षकः)एवंच अन्यप्रशिक्षकेषु मनीषः,विशालः,नूतनविष्णुः, मीना,ओमश्रीः,विमलेशः, प्रदीपः,रेनू अंशू चेत्यादयः समुपस्थिताः आसन्।31/12/2018 तमे दिनांके सायंकाले संस्थानस्य अध्यक्षमहोदयस्यपि पदार्पणं वर्गे जातः आसीत् । वर्गस्यान्तिमे दिवसे समापनसत्रे सर्वेभ्यः प्रमाणपत्राण्यपि प्रदास्यन्ते । मुख्यमंत्रिणः योगिमहोदयस्य अपेक्षितसहयोगेन योजनैषा आप्रदेशं संस्कतभाषायाः समुन्नत्यै अग्रेसरा भविष्यतीत्यस्माकं विश्वासः।

## भिवानी-स्थित-के.के.एम.-विद्यालये श्लोकोच्चारणमेवं पुस्तकविमोचनं

हरियाणा संस्कृत अकादमी माध्यमेन भिवानी स्थित के.के.एम विद्यालये त्रिवेणी संस्थायाः सहयोगेन जिलास्तरीय श्लोकोच्चारणं एवंपुस्तकविमोचनं कार्यक्रमस्यायोजनमभवत्। कनिष्ठ एवं वरिष्ठ वर्गे आयोजित अस्यां प्रतियोगितायां 35 विद्यालयतः छात्रः भागगृहीतवान् कार्यक्रमे श्रीमती नीलममहाजनचरायायाः पुस्तकं ''मैं मेघों को भरनेवाली'' एवं विजेन्द्रगाफिल माध्यमेन रचित



काव्य कैलेण्डरस्य विमोचनमपि अभवत्। कार्यक्रमे श्रीमनोजकुमारजी (आई.ए.एस.अतिरक्त उपायुक्त भिवानी) मुख्यातिथि आसीत्। अस्यातिरिक्त कार्यक्रमे आचार्य श्रीऋषिरामजी (अकादमीसदस्य), डॉ. कामदेवझाजी, जिलाशिक्षाअधिकारी श्रीरामावतारशर्माजी, डॉ. मुरलीध रजी (सं.प्र.) डॉ. अनिलकुमागौड़जी (प्रधानाचार्य), श्रीमिथलेशशास्त्रीजी (सं.प्र.) श्रीनन्दकिशोरजी (स.कार्य.) श्रीमतीरेणुसैनी (प्राचार्या) श्रीमती नीलममहाजनचराया, दत्तजी, शिवनारायणशास्त्रीजी, श्रीहंसराजटुटेजाजी, श्रीअशोकशास्त्रीजी, श्रीविजेन्द्रगाफिलजी, श्रीरोहितजी आदयः शिक्षाविद् एवं समाजिक कार्यकर्ता उपस्थिताः आसन्। अध्यक्षता दत्तजी कृतवान।

## प्रसिद्धः संस्कृतविद्वान् प्रो. रामकरणशर्मा दिवंगतो जातः



नवदेहली। राष्ट्रियसंस्कृतसंस्थानस्य संस्थापक पूर्वकुलपति एवं प्रसिद्ध संस्कृतज्ञ प्रो. रामकरणशर्मा जी अस्माकं मध्ये नास्ति। विंशत्याधिक संस्कृत काव्य एवं गगनवाणी सन्ध्या, कविता शेशुषुदीपिका एवं सीमा व रयिश नामक उपन्यासानां सृजक भाषाविज्ञानमेवं चरकसंहितायाः मर्मज्ञः साहित्य अकादमी एवं राष्ट्रपति पुरस्कार सहित बहुषु सम्मानेषु सम्मानित शर्मा महोदयस्य निधनं संस्कृत संसाराय अपूर्णीयक्षति अस्ति। तेषां जन्म 1927 तमे वर्षे सारनमण्डले अभवत्। ते जीवनपर्यन्तं विश्वे संस्कृतस्य प्रचारप्रसाराय संलग्नः आसन्। संस्कृत क्षेत्रस्य संस्था देववाणीपरिषद, संस्कृतसंवाद समाचारपत्र, भारतीयसंस्कृतपत्रकारसंघ एवं अनेके संस्कृतज्ञाः तेषां निधने शोक एवं श्रद्धान्जलि अर्पितवन्तः

# “लखनऊ D-I-E-T- मध्ये संस्कृतवाग्व्यवहारकार्यशालायाः सम्पूर्तिसमारोहः, प्रमाणपत्रवितरणं च।

संवाददाता-नूतनविष्णुरेग्मी(संस्कृतभाषाप्रशिक्षकः, उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ)

उत्तरप्रदेशसंस्कृतसंस्थानम्-लखनऊ एवं राज्य-शैक्षिक-अनुसंधान-एवं-प्रशिक्षण-परिषद्-लखनऊ इत्यनयोः संस्थयोःसंयुक्ततत्वावधानेन पंचदिवसीयायाःसंस्कृत-वाग्व्यवहार-कार्यशालायाः समायोजनं दिनांकः ०३/१२/२०१८ तः ०७/१२/२०१८ पर्यतम् (D.I.E.T)जिल्ला-शिक्षा एवं प्रशिक्षणसंस्थानम्,लखनउ-नगरे जातम् । अस्याःसमुद्घाटनसमारोहः ०३/१२/२०१८ दिनांके प्रातः ११ वादने जातः आसीत्। ०४/१२/२०१८ तमे दिनांके कार्यशालायां सर्वान् संबोधयितुं प्रेरयितुं च संस्कृतभारत्याः अवधप्रान्तस्य विभागसंगठनमंत्रिणःगौरवनायकमहोदयस्य समागमनं जातमासीत।अस्याः कार्यशालायाः समापनसमारोहः



०७/१२/२०१८ तमे दिनांके सम्पन्नः अभवत। अवसरेऽस्मिन् उत्तरप्रदेशसंस्कृतसंस्थानस्य परियोजनाधिकारी श्रीसुशीलकुमारमहोदयः स्वस्य सारगर्भितं मन्तव्यं तत्र अश्रावयत् । समापनसमारोहे मंचसंचालकःमनीषशर्मा(प्रशिक्षकः)आसीत्।कार्यक्रमे मुख्यातिथित्वेन श्रीःहरिबख्शासिंहः (निदेशकः,उत्तरप्रदेशसंस्कृतसंस्थानम्),अध्यक्षत्वेन डा.पवनकुमारसचानः(प्राचार्यः-D-I-E-Tलखनउ),विशिष्टातिथित्वेन श्रीः दिनेशकुमारशर्मा (वरिष्ठप्रशासनिकाधिकारी,उत्तरप्रदेशसंस्कृतसंस्थानम्)सारस्वतातिथित्वेन डा.रत्नेशमणित्रिपाठी (उत्तरप्रदेशसंस्कृतसंस्थानस्य लखनउपरिक्षेत्रसमन्वयकः, बी.के.झामहोदयः (डायट लखनउ,लेखाविभागस्य अधिकारी) चाधिमंचं विराजिताः आसन्। आदौ वैदिकमंगलाचरणम् विशालप्रसादः (प्रशिक्षकः)कृतवान्। प्रशिक्षिकाद्वयं(मीनाठक्करः,मीनाकुमारी च)ध्येयमंत्रं अकारयत्। अतिथयश्च



सरस्वतीपूजनं, दीपप्रज्ज्वलनं धूपाघ्रापनं च कृतवन्तः। मंचासीनानां अतिथीनां परिचयपुस्सरं पुष्पमालाभिः स्वागतं संस्कृतप्रशिक्षकेण नूतनविष्णुना कृतम्। कार्यशालायाः प्रास्ताविकं रत्नेशमहोदयः अश्रावयत्। स्वोद्बोधनकथनावसरे मुख्यातिथिवर्येण सर्वेभ्यः आभारं प्रकटितवन्तः। कार्यक्रमस्य अध्यक्षवर्येण पवनमहोदयेन प्रत्येकं विद्यालयेषु एकः संस्कृतप्रशिक्षकः भवेत् इति निदेशकमहोदयः प्रार्थितः ,तेन “संस्कृतं भारतस्य गौरवं,आत्मा च” इति उक्तम्।

ततः प्रशिक्षुगणेषु केचन मंचं आगत्य स्वप्रतिभाप्रदर्शनं (संभाषणम्,गीतगानम्,श्लोकगानम् च)कृतवन्तः। अनुभवकथनं डा. सुधा अवस्थी(अध्यापिका)श्रावितवती।तदनन्तरं तेभ्यः भागग्रहणप्रमाणपत्रवितरणकार्यक्रमः आसीत्।

कार्यक्रमे प्रशिक्षकाः मीनाठक्कर,मीनाकुमारी, मिश्रः,नूतनविष्णुरेग्मी,विशालप्रसादः मनीषशर्मा च उपस्थिताः आसन्। एते एव कार्यशालायां अस्याम् उपस्थितानां ९१ प्रशिक्षूणां

(सर्वकारीयविद्यालयीयशिक्षकाणां) पंचसु दिवसेषु

प्रक्षेपकयंत्रं संगणकं च प्रयुज्य PPT SLIDES द्वारा प्रतिदिनं प्रशिक्षणं गणद्वये (जयगणे,विजयगणे च)कृतवन्तः। एतदतिरिच्य बहुविधव्यवस्थां अपि एते एव दृष्टवन्तः। कार्यशालायां संस्थानपक्षतः डा. रत्नेशमहोदयस्य, D.I.E.T. लखनउतः प्राचार्यस्य पवनमहोदयस्य, (कार्यशालायाः संयोजिकयोः )श्रीमती रुबीपाण्डेयवर्यायाः मीरापाण्डेयवर्यायाश्च महत्वपूर्णा भूमिका आसीत। अन्ते सर्वेषां घन्यवादज्ञापनं मीरादेवीपाण्डेयमहोदया (नोडल अधिकारी,डायट लखनउ) कृतवती शान्तिमन्त्रस्य सहपाठेन च समापनसमारोहस्यास्य पंचदिवसीया-संस्कृतवाग्व्यवहारकार्यशालायाः च सम्पूर्तिः अभवत्।


# राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्, गुणवत्ताप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्)

56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

## संस्कृत सीखने के लिए समाचार पाठ्यक्रम (२०१८-२०१९)

मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन **राष्ट्रिय संस्कृत संस्थान** (मानित विश्वविद्यालय) द्वारा पत्राचार माध्यम से संस्कृत सीखने के लिए द्विवर्षीय संस्कृत पाठ्यक्रम चलाया जा रहा है। एक वर्ष के लिए पाठ्यक्रम शुल्क 500/-रू. भारतीय नागरिकों के लिए तथा 50$ (50 यू.एस. डॉलर) विदेशी नागरिकों के लिए है। शुल्क डिमाण्ड ड्राफ्ट द्वारा **'कुलसचिव, राष्ट्रिय संस्कृत संस्थान** (मानित विश्वविद्यालय)' के नाम से भेजा जा सकता है। आवेदन पत्र संस्थान की वेबसाइट पर उपलब्ध है। शुक्ल सहित आवेदन पत्र प्राप्ति पर नामांकन किया जाएगा। तथा पाठ्यसामग्री अध्ययनार्थी को डाक द्वारा भेजी जाएगी। पूरित आवेदन पत्र **सहायक निदेशक,** पत्राचार पाठ्यक्रम, **राष्ट्रिय संस्कृत संस्थान** (मानित विश्वविद्यालय) 56-57, इन्स्टीटयूशनल एरिया, नई दिल्ली-110058 को भेजना सुनिश्चित किया जाए। विस्तृत विवरण के लिए कृपया संस्थान की वेबसाईट www.sanskrit.nic.in. पर अवलोकन करें। सम्पर्क टेलीफोन नं. 011-28521994, 28524993, 28524995 - एक्सटेंसन नं. 252, 237

**कुलसचिव (प्र.)**


# प्रो.सत्यदेववर्मा-जन्मशताब्दिसमारोहः एवं संस्कृतसंगीतसुरभिकार्यक्रमः

नवदेहली। द्वारका दिल्ली स्थित दीनदयालोपाध्याय महाविद्यालयस्य सभागारे dubcom creative pvt.ltd. नामक एका मिडिया औद्योगिक क्षेत्र माध्यमेन संस्कृत संगीतस्य एकं आकर्षक कार्यक्रम प्रायोज्यते। कार्यक्रममिदं संस्कृतस्य मुर्धन्य कवि लेखक विचारक एवं पत्रकार स्वर्गीय प्रो. सत्यदेववर्मा महोदयस्य जन्मशताब्दिं समर्पितम्। प्रो. वर्मा संस्कृत भाषां समृद्धयर्थं जीवनपर्यन्तं प्रयासः कृतवान। तेषां रचना संस्कृतम् कुरानम्, केशवचरितम्, एवं पाक्षिक संस्कृत पत्रिका हितसाधिका विशेष रूपेण उल्लेखनीयोऽस्ति अस्मिन्नवसरे तेषां भार्या डॉ. कमलावर्मा (पू.मं.हरियाणा) एवं परिवारजनाः आसन्। विशिष्टातिथि पद्मभूषण सत्यव्रतशास्त्री श्रीपरमेश्वरनारायणशास्त्री (उपकुल.रा.सं.संस्थान) एवं मेजर जेनरल गोवर्धसिंह जयवाल (पूर्व राष्ट्रपति सुरक्षा सचिव) आसन्।



दीप्रज्वालनेन कार्यक्रमस्य शुभारम्भो जातः। प्रथमे श्रीवर्मा महोदयस्य जीवने आधारित आकर्ष वृत्तचित्र प्रस्तुतम् येन् सिध्यति यत् श्रीवर्मा महोदय कथं संघर्ष कृत्वा साहित्य सृजनं कृतवान। तदुपरान्ते तेषां गीतस्य गायनं सर्वं मंत्रमुग्धं कृतवान। आकर्षणस्य केन्द्र ग्रुपकैप्टन राजीवकान्वर्मा, सुमुधा वर्मा एवं हिमांशु वर्मा, वर्मा महोदयस्य परिवारोऽस्ति सर्वे संस्कृतस्य सम्यक् उच्चारणं कृत्वा सर्व सम्मोहितम्। कार्यक्रमस्य पश्चात् श्रीपरमेश्वरशास्त्री आयोजनकानां प्रशंसा कृत्वा श्रीवर्मा महोदयं श्रद्धाञ्जलि दत्तवान। एवमुक्तवान एतादृशं कार्यक्रम भवितव्यं येन संस्कृतं प्रति रूचि भविष्यति। प्रख्यात लेखक श्री नरेन्द्र सहगलः तेषां रचना सांस्कृतम् कुरानम् एवं केशव चरितम् इत्यस्य बहु प्रशांसा कृतवान।

जनरल जयवाल उक्तवान यत् भारते संस्कृतस्य उपेक्षा अभवत्। अस्य उत्थानाय प्रयासः करणीयः। अन्ते सर्वे अस्य कार्यक्रमस्य आयोजनेन प्रसन्नो जातः।


**पाठकानां कृते सूचनाः-**

**कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- (संस्थादीनां कृते) द्विवार्षिकशुल्क रु. २४०/- (व्यक्तीनां कृते) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते।**

**वित्तकोषविवरणम्-**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**

**Indian Overseas Bank, Yamuna Vihar, Delhi-110053**

**IFC Code- IOBA0002249**

# सम्पादकीयम्

**अयि पीयूषपानकुशलाः सहृदयाः संस्कृतानुरागिणः!**
**आङ्ग्लनववर्षस्य शुभककामनाः।**

मान्याः! अनुदिनं सुरभारतीयं समेधते देशे देशान्तरे वेति विज्ञाय मनो मोदते भारतीयानामस्माकम्। महतां मुनीनां चिन्तकानामयं देशः सम्प्रति सर्वेष्वपि क्षेत्रेषु ख्यातिं लभत इति चेतो विभाव्य प्रमोदते। किन्तु साम्प्रतमपि यादृशं कार्यं समपेक्षितमस्ति तादृशं शनैषनैः क्रियमाणमस्ति। सत्यमेतत् वैदेशिकभाषाणां देशे प्रयोगो विधीयमानो वर्तते, किन्तु एतदपि सत्यं यत् संस्कृतभाषा प्रतिपलं वृद्धिमुपयाति। सर्वत्र समायोज्यमानाः क्रार्यक्रमाः संगोष्ठ्यः सभाष्चेति संस्कृतस्य संवर्धनमेव विख्याति। भाषन्ते अनभिज्ञाः यत् संस्कृतं न श्रूयते। अहं पृच्छामि तान् विमूढान् यत् क्व न संस्कृतं श्रूयते भोः? स्थले आकाशे अन्यत्रापि संस्कृतरवो वधिरेणापि श्रूयमाणो वर्तत इति जानीमो वयम्। अनुदिनं लिख्यमानानि काव्यानि, नाटकानि, कथाः संस्कृतं गतिशीलतामेव विद्योतयन्ति।

संस्कृतं केवलं भाषैव नास्ति, अपितु संस्काराणां खनिरस्ति। यादृशी भावना, प्रेरणा, कर्तव्यनिष्ठा अस्याः परिशीलनेन समुत्पद्यन्ते तदन्यत्र सुदुर्लभमेवास्ति। नैतिकमूल्यानां देष्ठास्य समुत्थानाय राष्ट्रस्य विकासाय मानवोपकाराय यदि काचिद् भाज़ा क्षमास्ति सास्ति संस्कृतभाषा। वसुधैव कुटुम्बकम्, जननी जन्मभूमिश्चेति वाक्यानि संस्कृतस्य प्राणतत्त्वभूतानि सन्ति।

अतः अस्माभिः देशस्येयं प्राचीना भाषा संरक्षणीया वर्तते। वयं संकल्पं गष्टह्णीमो यत् आजीवनं संस्कृतस्य संवर्धनाय कार्यं करिष्यामहे।

# वेदामृतम्

**( ऋग्वेदभाष्यम् )**

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

अब पन्द्रहवें सूक्त का आरम्भ है। उसके प्रथम मन्त्र में ऋतु
ऋतु में रस की उत्पत्ति और गति का वर्णन किया है–

**इन्द्रं सोमं पिब ऋतुना त्वा विशन्त्विन्दवः।**
**मत्सरासुस्तदोकसः ।।१।।**

अर्थ–यह सूर्य वर्ष, उत्तरायण–दक्षिणायन, वसन्त आदि ऋतु, चौत्र आदि बारहों महीने, शुक्ल और कृष्णपक्ष, दिन–रात मुहूर्त जो तीस कलाओं का संयोग, कला जो ३० [तीस] काष्ठा का संयोग, काष्ठा जो अठारह निमेष आदि समय के विभागों को प्रकाशित करता है, जैसे मनुजी ने कहा और उन्हीं के साथ सब ओषधियों के रस और सब स्थानों से जलों को खींचता है, वे किरणों द्य के साथ अन्तरिक्ष में स्थित होते हैं, तथा वायु के साथ आते जाते हैं ।।१।।

अब ऋतुओं के साथ पवन आदि पदार्थ सब को खींचते और पवित्र करते हैं, इस विषय का उपदेश अगले मन्त्र में किया है–

**मरुतः पिबेत ऋतुना पोत्राद् यज्ञं पुनीतन।**
**यूयं हि ष्ठा सुदानवः।।२।।**

अर्थ–ऋतुओं के अनुक्रम से पवनों में भी यथायोग्य गुण उत्पन्न होते हैं, इसी से वे त्रसरेणु आदि पदार्थों के हेतु होते हैं, तथा अग्नि के बीच में सुगन्धित पदार्थों के होम द्वारा वे पवित्र होकर प्राणिमात्र को सुखसंयुक्त करते हैं और वे ही पदार्थों के देने लेने में हेतु होते हैं ।।२।।

अब ऋतुओं के साथ विद्युत् अग्नि क्या करता है, इस विषय का उपदेश अगले मन्त्र में किया है –

**अभि यज्ञं गृणीहि नो ग्रावो नेष्टः**
**पिब ऋतुना। त्वं हि रत्नधा असि।।३।।**

अर्थ–जो बिजुली अग्नि की सूक्ष्म अवस्था है, सो सब स्थूल पदार्थों के अवयवों में व्याप्त होकर उनको धारण और छेदन करती है, इसीसे यह प्रत्यक्ष अग्नि उत्पन्न होके उसी में विलय हो जाता है।।३।।

अग्नि भी ऋतुओं का संयोजक होता है, इस विषय का उपदेश अगले मन्त्र में किया है–

# श्लोकोच्चारण-गीतासंवादप्रतियोगितायाः आयोजनम्

हरियाणा सं. अका. पंचकूला माध्यमेन डी.ए.वी.पुलिस पब्लिक विद्यालये जिलास्तरीय श्लोकोच्चारण एवं गीतासंवादप्रतियोगितायाः आयोजनमभवत्। एषु 41 विद्यालयतः 76 छात्र भागं गृहीतवन्तः। कार्यक्रमस्याध्यक्षता डॉ. कामदेवझा (प्रा.डी.ए.वी.महा.पिहोवा) कृतवान।



अस्यातिरिक्त डॉ. बलवन्तवत्स (प्रा.रा.मा.ब.वा.वि.मुस्थला कुरू.) डॉ. सुरजभानजी (अका.सदस्य, सहा.आ.सं.विभा. गुरूकुल खरल जींद) श्री रवीन्द्रकौशिकजी (प्रधा.डी.ए.वी.ब.मा.वि.नरवाना) श्रीराजेशकुमार (प्रधा.डी.ए.वी.पुलिस पब्लिक स्कुल जींद), श्रीमती कमलेशकुमारी (सं.अध्या.)श्री सुरजमलजी, श्री अनुपम भाटिया जी, (सहा.आ.चौ.प.सिंह.वि.वि. जींद) श्री मणिरामजी (सेवानिवृत्त) खेल अधिकारी) उपस्थिताः आसन्। श्रीमती संजुआर्या मंच संचालनं कृतवती। सा संस्कृत चित्र प्रदर्शन्याऽपि आयोजनं कृतवती। अकादमी निदेशक सोमेश्वरदत्त मुख्यातिथि आसीत्।

## नो म्रियेऽहं न जीवाम्यहं हे प्रभो!

–डॉ. अरविन्दतिवारीः

त्वं ददासीव मे सौख्यराशिं मुदा
येन मग्नं मनो मोदते मामकम्।
तत्क्षणं शूलमेवं नु दत्से ध्रुवं
नो म्रियेऽहं न जीवाम्यहं हे प्रभो!1

मत्कुटीरे हरे स्वर्णवृष्टिं चिरं
त्वं करोषीव जानेचिरं तत्परम्।
हन्सि लुण्टाकचौरान् कथं प्रेषयन्
नो म्रियेऽहं न जीवाम्यहं हे प्रभो!2

शस्यपूर्णां कृषिं हन्त कुर्वन् विभो
कर्षसीवात्र दृष्टिं मदीयां ततः।
हैमपातं करोषीव मां रावयन्
नो म्रियेऽहं न जीवाम्यहं हे प्रभो।3

यस्य वृक्षस्य सेवा कृताहर्निशं
तस्य पक्वं फलं त्वत्प्रदत्तं न तत्।
कीटकैर्भक्षितं किन्त्वयैतत्कृतं
नो म्रियेऽहं न जीवाम्यहं हे प्रभो।4

मित्रवृन्दं मदर्थं हरे कल्पयन्
नैव मित्रं ददासीव विश्वासगम्।
किं वदेयं हृदा किं भजेयं मुदा
नो म्रियेऽहं न जीवाम्यहं हे प्रभो।।5

नैव भुक्तं सुखं रामरूपेण यत्
कृष्णरूपेण भुक्तं न तद् भारते।
तद्धि मज्जीवने हाद्य दत्सेप्रियं
नो म्रियेऽहं न जीवाम्यहं हे प्रभो।।6

## नववर्षः

डॉ.राजेन्द्र त्रिपाठी 'रसराज'
अध्यक्ष ,संस्कृत विभाग
इलाहाबाद डिग्री कॉलेज
इलाहाबाद वि.वि.,प्रयागराज

समायातोऽद्य वर्षोऽयं , नूतनो जीवने बन्धो!
समेषां मङ्गलं सौख्यं कामये सादरं बन्धो ! 1!

गतः कालः प्रयुक्तो यो मानवैर्लोकलीलायाम्।
पुनशचायाति कालोऽयं गृहे जनजीवने बन्धो!2!

कदाचिन्मित्रतां लब्ध्वा मानसे मोदते मित्रम्।
कदाचिच्छत्रुतां दृष्ट्वा विपत्तिर्बाधते बन्धो!3!

गतिर्वानागतिर्लोके सूर्यचन्द्रौ सदा चरतः।
दिवारात्रं सदा कालः काशते मण्डले बन्धो!4!

विषं त्यक्त्वाऽमृतं पीत्वा देवलोकेऽपि चातङ्कः
सुराः वा राक्षसाः सर्वे ग्रसन्ते पीडया बन्धो! 5!

ऋतं नैवानृतं न्याये दृश्यते नाद्य संसारे।
जनाधारैर्धनैर्मानं लभन्ते मानवाः बन्धो!6!

यतो यातस्ततः प्राप्तो नैव सौख्यं विना कार्यम्।
जनैर्मुख्यार्थलाभार्थं जीवनं धार्यते बन्धो!7!

विरक्ताः साधवो मन्ये मन्दिरे मस्जिदे लुण्ठाः।
मठे देवालये भ्रष्टा रमन्ते चाधिका बन्धो!!



# गीताज्ञानप्रतियोगितायायोजनम्

हरिद्वार। श्रीभगवानदास आदर्श संस्कृत महाविद्यालय प्राचीन अवधूत मण्डल आश्रम हरिद्वार माध्यमेन गीताज्ञान प्रतियोगितायायोजनमभवत्। येषु हरिद्वारस्य प्रायसः सर्वेषां महाविद्यालयानां




छात्राः भागं गृहीतवन्तः। प्रथमपुरस्काराय 11000 द्वितीय 9000 तृतीय 7000 दत्तवान। कार्यक्रमे आयोजनसमितेः अध्यक्ष स्वामि कपिलमुनिजी महाराज उपाध्यक्ष महंतस्वामि रूपेन्द्र प्रकाशमहाराज सचिव प्राचार्य डॉ. भोलाझा, उ.सं.अका. उपाध्यक्ष प्रेमचन्द्रशास्त्रीजी देवसंस्कृति महाविद्यालयस्य प्राचार्य भट्टजी एवं विद्वद्जनाः, छात्र-छात्राभ्य उपस्थिताः आसन्।

# संस्कृतभारतीद्वारा त्रिदिवसीय-आवासीय-संस्कृतसम्मेलनस्य आयोजनं भविष्यति

नवदेहली । (डॉ.नवीनशर्मा) संस्कृतभारतीद्वारा दक्षिणीदेहल्याः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठे कटवारियासरायनामकस्थाने त्रिदिवसीय-आवासीय-संस्कृतसम्मेलनस्य आयोजनं भविष्यति इति विवरणं संचालन-समित्याः प्रमुखेण प्रो. यशवीरमहोदयेन दत्तम्। सः उक्तवान् यत् सम्मेलनस्य उद्घाटनं दिसम्बरमासस्य 29 दिनांके शनिवासरे केन्द्रीय-पर्यावरण-प्रौद्योगिकीमंत्री डॉ. हर्षवर्धनः करिष्यति । 28 दिसम्बरतः 30




दिसम्बरपर्यन्तम् आवासीय प्रान्त-सम्मेलने संस्कृतभारती देहल्याः 500 कार्यकर्तारः, संस्कृतविद्वान्सः संस्कृतानुरागिणश्च भागग्रहणं करिष्यन्ति । दिसम्बरमासस्य 28 तमे दिनांके शुक्रवासरे सायंकाले 05:00 वादने संस्कृतप्रदर्शिन्याः उद्घाटनं कार्यक्रमः भविष्यति यस्मिन् संस्थानस्य कुलपतिः प्रो.पी.एन.शास्त्री,विद्यापीठस्य कुलपतिः प्रो.रमेशपाण्डेयः,यूजीसी संस्थानस्य निदेशकः डॉ. डी. पी. सिंहश्च करिष्यन्ति। सम्मेलने दिल्लीविश्वविद्यालयेन सम्बद्ध- महाविद्यालयाः, जेएनयू, जामिया मिलिया इस्लामिया, एनसीईआरटी एवं आईआईएमसीसंस्थायाः महानिदेशकः श्री के. जी सुरेशः, आईआईटीतः विभिन्नाः प्राध्यापकाः, संस्कृतछात्राः भागग्रहणं करिष्यन्ति । सम्मेलने संस्कृतभारत्याः अखिलभारतीयसंगठनमंत्री श्रीदिनेशकामतमहाभागः, राष्ट्रीयाध्यक्षः प्रो. भक्तवत्सलः, उत्तरक्षेत्रीय संगठनमंत्री श्रीजयप्रकाशः, देहलीप्रान्तस्य अध्यक्षः प्रो. हरेरामत्रिपाठी एवं केन्द्रीय मंत्री डॉ. हर्षवर्धनः कार्यक्रमस्य उद्घाटनं करिष्यन्ति । अस्मिन् शुभावसरे विधायकः प्रो. करतारसिंहः, प्रो. कमलाभारद्वाजः च इत्यादयः उपस्थिताः भविष्यन्ति इति विवरणं संस्कृतभारती-प्रचारप्रमुखः डॉ. नवीन शर्मा दत्तवान्। संस्कृतभारतीदेहल्याः प्रान्तः अध्यक्षः प्रो. हरेराम त्रिपाठीमहोदयः उक्तवान् यत् सम्मेलने संस्कृतभारत्याः 37 वर्षाणां कार्यपरिचयः, भविष्यस्य कार्ययोजना एवं संस्कृते सांस्कृतिक-कार्यक्रमाणाम् आयोजनं भविष्यति । प्रेस कान्फ्रेसद्वारा प्रो. हरेरामत्रिपाठीमहोदयः उक्तवान् यत् सम्पूर्णसम्मेलने संस्कृतमय वातावरणं भविष्यति यद् सामान्यजनेभ्यः संस्कृतानुरागिभ्यश्च आकर्षणस्य केन्द्रं भविष्यति । सम्मेलने संस्कृतजगत्सम्बन्धी-विभिन्नानि चर्चासत्राणि, विचार-विमर्शः संगोष्ठीसत्रं च भविष्यन्ति । संस्कृतभारती-माध्यमेन अद्य लक्षाधिक-जनाः धाराप्रवाहरुपेण संस्कृतं वदन्ति । सहस्राधिक-परिवाराः संस्कृतपरिवाराः सन्ति ।येषां गृहे सर्वे सदस्याः प्रतिदिनं संस्कृतं वदन्ति । भारतदेशे षड्ग्रामाः संस्कृतग्रामाः यत्र जनाः प्रतिदिनं संस्कृतमेव वदन्ति । विश्वस्य 20 देशेषु संस्कृतभारत्याः कार्यम् अस्ति । लक्षाधिक-संस्कृतसमर्पितकार्यकर्तारः सततं संस्कृतप्रचारः प्रसारश्च कुर्वन्तः सन्ति। प्रैसकान्फ्रैंसमध्ये प्रो.परमानन्दमहोदयेनापि सर्वेषां पत्रकाराणां स्वागतं कृतम्। संयोजकः डॉ. परमेशमहोदयः उक्तवान् यत् संस्कृतभाषायां सम्पूर्णं ज्ञान-विज्ञानं समाहितमस्ति। अत एव संस्कृतभाषायाः संरक्षणार्थं एवं च गृहे-गृहे संस्कृतभाषा भवेत् येन नैतिकमूल्यानां विकासः भवेदिति उद्देश्यं स्वीकृत्य संस्कृतभारती-संघटनं सर्वदा प्रयत्नशीलमस्ति।

# संस्कृतशिक्षकाणाम् अनिश्चितकालीनम् आमरणम् अनशनम्

नवदेहली। मासस्य शीतऋतौ-राष्ट्रियसंस्कृतसंस्थानस्य सम्पूर्ण देशस्य परिसरे संविदा आधारित कार्यरत प्रायसः 60-70 शिक्षक संस्थानमुख्यालयस्य समक्षे आमरण अनशने सन्ति। एतेषां कथनमस्ति यत् संविदा एवं अतिथि रूपे कार्यरत शिक्षकानां नियुक्ति भवितव्यम्। तान् सप्तमवित्तआयोगस्य अनुसारेण् सहायकाचार्यस्य समान सर्वे सुविधा भवितव्यम्। इतः पूर्वमपि एते सर्वे जन्तरमन्तरे स्व विरोध प्रदर्शनं कृतवान्। एतेषां अरोपमस्ति यत् ते राष्ट्रियसंस्कृतसंस्थानस्य




विभिन्न परिसरे गत 10तः 12 वर्षतः पाठयन्ति। तान् न सम्पूर्ण मानदेय ददति व अन्य कोऽपि लाभः। तान् प्रतिवर्ष दस मासपर्यन्तं पञ्चविंशति सहस्त्र ददति। केन्द्र सर्वकारस्य मा.सं.वि. मंत्रालयस्य अधीन रा.सं.संस्थानं सम्पूर्ण भारतस्य वृहत् संस्कृतविश्वविद्यालयमस्ति। यस्य 16 परिसर 20 मान्यताप्राप्त शिक्षण संस्थानोऽस्ति। अत्र अनशने महिला शिक्षिका अपि अस्ति। येषु जम्मुपरिसरतः डॉ. संतोषगोडरा अपि अस्ति। गत् रात्रि डॉ. संतोषगोडरा महोदयः अस्वस्थो जातः। तेन् कारणेन् ते अस्पताल गतवन्तः।

एतेषां कथनमस्ति यत् संस्कृत एवं संस्कृतेः रक्षा करणार्थं संकल्पित भारत सर्वकारे संस्कृताध्यापकानां स्थिति चिन्तनीयोऽस्ति। अस्य संस्कृत शिक्षकसंघ दिल्ली अपि स्वागतं कृतवन्तः। संघस्य कथनमस्ति यत् सर्वकारः शीघ्रतया संस्कृतशिक्षकानां समस्यायाः निराकरणं कुरू।

# श्रीमती मधुधामा संस्कृतिमनीषीसम्मानेन सम्मानिता जाता



नवदेहली। दिल्ली पब्लिक लाइब्रेरी बोर्ड संस्कृति मंत्रालय (भारत सर्वकारः) माध्यमेन वर्ष 2018 इत्यस्य संस्कृति मनीषी सम्मान वैदिक विदूषी श्रीमति मधु धामायै दत्तवन्तः। मधुयामायाः आत्मकथा “घरवापसी” एवं बहु चर्चितां एवं विश्वविख्यात पुस्तमस्ति। यो बहुषु भाषासु अस्ति। एतस्याः जन्मः मुस्लिम परिवारे अभवत् परञ्च एतस्याः आस्था वेदे अस्ति। स्वामी दयानन्दस्य 2015 चित्रेण् सह बहुरंगी जीवन “महर्षि दिव्यदर्शन इत्यस्य लेखनं एवं दूर्लभ चित्रसंकलनस्य श्रेय एतां गच्छति। एतां अयं सम्मानः वैदिक संस्कृतेः प्रचार प्रसार, राष्ट्रवादी लेखनमेवं मानवीय मूल्यानां रक्षार्थं एकस्मिन् भव्यसमारोहे दास्यन्ति। सम्मानेन् सह प्रशस्ति पत्र, सार्धएक लक्ष्य रूप्यकानि एव वस्त्रं दास्यन्ति।


ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज़, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

## सत्यार्थ प्रकाश

सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति सत्यार्थ प्रकाश के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6
Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# 'मनोगतम्' – 51

## प्रसारण-तिथिः – 30-12-2018



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः, नमस्कारः। अष्टादशोत्तर-विंशतिशततमं वर्षं पूर्णतामेति। वयं नवदशोत्तर-विंशतिशततमं वर्षं प्रवेक्ष्यामः। स्वाभाविक-रूपेण एतादृशे काले, विगत-वर्षस्य विषयाः चर्च्यन्ते, युगपदेव आगामिवर्षस्य संकल्पस्यापि चर्चा श्रुयते। भवतु नाम व्यष्टिजीवनम्, समाजजीवनम्, राष्ट्र- जीवनं वा - प्रत्येकमपि जनस्य कृते सिंहावलोकनं भवत्यनिवार्यम्, तथा च, यथादूरमपि शक्यं तावद् दूरं भविष्यति द्रष्टुमपि प्रयतनीयम्, तदैव अनुभवानां लाभोह्यपि प्राप्यते, तथा च, किमपि नूतनमाचरितुम् आत्मविश्वासोह्यपि लभ्यते। वयम् एतादृशं किं करवाम येन निज-जीवनं परिवर्तयितुं शक्नुम ? युगपदेवदेशं समाजञ्च अग्रेसारयितुं स्वीयं योगदानं कर्तुं शक्नुम ? भवतां सर्वेषां कृते नवदशोत्तर-विंशतिशततमं वर्षं शुभं भवेदिति कृत्वा कोटिशः शुभकामनाः व्याहरामि। भवन्तः सर्वेह्यपि कदाचित् विचारितवन्तः यत् अष्टादशोत्तर-विंशतिशततमं वर्षं केन प्रकारेण स्मरणीयम् ? अष्टादशोत्तर-विंशतिशततमं वर्षं हिभारतमेकदेशरूपेण, स्वीयानां त्रिंशदुत्तरशत-कोटि-जनानां सामर्थ्यरूपेण च, केन प्रकारेण स्मरिष्यते-एतत् स्मरणमपिमहत्वपूर्णमस्ति। अस्माकं सर्वेषां कृते गौरवप्रदं वर्तते।

अष्टादशोत्तर-विंशतिशततमे वर्षे, विश्वस्य बृहत्तमा स्वास्थ्यागोप-योजना 'आयुष्मान् भारतम्' इत्यारभत। देशस्य प्रत्येकमपि ग्रामः विद्युत-सौविध्यमलभत। विश्वस्य गणमान्याःसंस्थाः स्वीकृतवत्यः यत् भारतं आलेख्य-गत्या,देशं निर्धनतातो मुक्तिं प्रयच्छति। देशवासिनां दृढसंकल्प-कारणात् स्वच्छता-कार्याणि एधित्वा प्रतिशतं पञ्चनवतितोह्यप्यधिकानि भूत्वा तद्दिशि अग्रेसरन्ति।

स्वाधीनता-प्राप्तेः अनन्तरं रक्त-दुर्गात् प्रथमवारं, 'आजाद-हिन्द-सरकार'-इत्यस्य पञ्च-सप्तति-वर्षपूर्त्यवसरे त्रिवार्णिको ध्वजः उत्तोलितः। देशम् एकतासूत्रेण सन्नद्धकस्य, सरदारवल्लभभाईपटेलस्य सम्माननार्थं विश्वस्य उच्छ्रिततमा प्रतिमादेशेनाधिगता । जगति देशस्य नाम गौरवान्वितं जातम्। देशः संयुक्तराष्ट्रस्य सर्वोच्चं 'Champions of the Earth'- इति पर्यावरणपुरस्कारेण सम्मानितः। सौरोर्जायाः ऋतु-परिवर्तनस्य च क्षेत्रे भारतेन विधीयमानाः प्रयासाः संसारेण अभिज्ञाताः। भारते, आन्ताराष्ट्रिय-सौर-संयुतेः प्रथमा महासभा 'International Solar Alliance'-इत्येषा आयोजिता। अस्माकं सामूहिकप्रयासानामेव परिणाम-जातमिदं यत् अस्माकं देशस्य व्यापार-स्तर-निर्धारणे ease of doing business ranking-इत्यत्र अभूतपूर्वःपरिष्कारो जातः। देशस्य आत्म-संरक्षणं नूतनतया दृढतरमभवत्। अस्मिन्नेव वर्षे अस्माकं देशः सफलतया परमाणु-त्रिकं Nuclear Triad-इति पूर्णतामनयत्, अर्थात् इतः परं वयं जलस्थल-नभस्सु परमाणुशक्तिसम्पन्नाः संवृत्ताः। देशस्य दुहितृभिः नाविका-सागर-परिक्रमा-माध्यमेन सम्पूर्णविश्वस्य भ्रमणमनुष्ठाय देशोह्ययं गौरवान्वितो विहितः। वाराणस्यां भारतस्य प्रथमस्य जलमार्गस्य आरम्भो जातः। अमुना जलमार्गक्षेत्रे नूतनायाः क्रान्तेः सूत्रपातोह्यजायत। देशस्य दीर्घतमस्य 'बोगीबील- ब्रिज' इति रेल-भूमार्गसेतोः लोकार्पणमभवत्। सिक्किमे आद्यस्यदेशे च, शततमस्य विमानपत्तनस्य 'पाक्योंग'इत्यस्य शुभारम्भः अजायत। ऊन-विंशतिक्रिकेट्विश्व-चषक-स्पर्धायां दृष्टि-बाधित-क्रिकेट्विश्व-चषक-स्पर्धायाञ्च भारतं विजयश्रियमवाप्नोत्। ऐषमः क्रमे, एशिया-क्षेत्रीय-क्रीडास्पर्धासु भारतं पदकानाम् अधिसंख्यं विजितवत्। Para Asian Games - इति दिव्याङ्ग-स्पर्धास्वपिभारतं शोभनं प्रदर्शनमकरोत् । एवं हि, यद्यहं प्रत्येकमपि भारतीयस्य पुरुषार्थस्य, अस्मदीय-सामूहिकप्रयासानां विषये अभिभाषयेयम्,तर्हि अस्माकं 'मनकीबात-इति प्रसारणं तावत्काल-पर्यन्तं प्राचलिष्यत्, स्यात् नवदशोत्तर-विंशतिशततमं वर्षम् आगमिष्यत्। एतत् सर्वमपि त्रिंशदुत्तरशत-कोटि-देशवासिनां अनारत-प्रयासैः शक्यमजायत। आशासे यत् नवदशोत्तर-विंशतिशततमे वर्षेह्यपि भारतस्य उन्नति-प्रगत्योः यात्रेयं एवमेव सततं प्रचलिष्यति, तथा चास्मदीयोह्ययं देशः इतः परमपि दृढतया नवीनाः उपलब्धीः अवाप्स्यति।

मम प्रियाः देशवासिनः, ऐषमः डिसेम्बर-मासे वयं कैश्चित् असाधारणैःदेशवासिभिः वियुक्ताः जाताः। मासेह्यस्मिन् ऊनविंशतितमे दिने चेन्नई-नगरस्य डॉक्टर-जयाचंद्रन् प्राणान् अत्यजत्। जनाः प्रेम्णा डॉक्टर्जयाचंद्रन्-महोदयं 'मक्कल-मारुथुवर'- इति निगदन्ति स्म यतो हि असौ जनानां हृदयेषु निवसति स्म। डॉक्टर्जयाचंद्रन् निर्धनानां कृते अल्पात्यल्प-मूल्यैः उपचारान् प्रापयितुं सुख्यातः आसीत्। जनाः कथयन्ति यदसौ रुग्णानां समुपचारार्थं सर्वदैव तत्परो भवति स्म। उपचारार्थं तत्समीपम् आगम्यमाने- भ्यो वृद्धेभ्यो रुग्णेभ्यः गमनागमनार्थं भाटकमपि असौ ददाति स्म। अहं thebetterindia.com website इत्यन्तर्जालवाहिन्यां समाजस्य कृते प्रेरणा-प्रदायीनि तस्य अनेकानि कार्याणि पठितवान्।

एवं हि, मासेह्यस्मिन् पञ्चविंशे दिने कर्नाटकस्य सुलागिट्टी-नर- सम्मायाः निधनवृत्तम् अधिगतम्। सुलागिट्टी-नरसम्मागर्भवतीनां मातृ-भगिनीनां प्रसव-क्रियावसरे सहायिकासीत् । सा कर्नाटके, विशेषेण तत्रत्येषु दुर्गम-क्षेत्रेषु मातृ-भगिनीनांपरस्सहस्रेभ्यः निज-सेवाः प्रादात् । एतद्वर्षारम्भे सा 'पद्मश्री'त्यलंकरणेन सम्मानिता। डॉ.जयाचंद्रन्-सुलागिट्टी-नरसम्मा-सदृशाः अनेके प्रेरकाः जनाः सन्ति, ये हि समाजे सर्वेषां कल्याणाय निजजीवनंसमर्पितवन्तः। यदा वयं स्वास्थ्योपचर्या-विषये चर्चां कुर्मः, तदात्राहं उत्तर- प्रदेशस्य बिजनौर-वास्तव्यानां चिकित्सकानां सामाजिक-प्रयासान् अपि चर्चितुं वाञ्छामि। विगतेषु दिनेषु अस्मदीय-दलस्य केचन कार्यकर्तारो माम् असूच- यन् यत् नगरस्य केचन युव-चिकित्सकाः शिबिराणि आयोज्य निर्धनान् निःशुल्कम् उपचारयन्ति। अत्रत्यस्य हृदय-फुफ्फुस-सङ्कट-केन्द्रस्य पक्षतः प्रतिमासम् एतादृंशि चिकित्सकीय-शिबिराणि आयोज्यन्ते यत्र अनेकविधाः रोगाः निःशुल्कं समुपचार्यन्ते। साम्प्रतं, प्रतिमासं रुग्णानां परश्शतं एतैः शिबिरैः लाभान्विताः भवन्ति। निःस्वार्थभावेन सेवा-संलग्नानां एतेषां चिकित्सकमित्राणाम् उत्साहो नितरां प्रशंसनीयः एव। अद्याहं विषयमेनम् अतितरां गर्वेण विनिवेदयामि यत् सामूहिक-प्रयासैरेव 'स्वच्छ-भारत-कार्यक्रम' सफलाभियानत्वेन सिद्धः। केचन जनाः मामसूचयन् यत् केभ्यश्चित् दिनेभ्यः प्राक् मध्यप्रदेशे जबलपुरे युगपदेव त्रिलक्षाधिकाः जनाः स्वच्छताभियाने संलग्नाः जाताः। स्वच्छतायाः महायज्ञेह्यस्मिन् नगरनिगमः, स्वयंसेवि- संघटनानि, विद्यालय-महाविद्यालयानां विद्यार्थिनः, जबलपुरस्य नागरिकाः, सर्वेह्यपि सोत्साहं सहभागित्वं निरवहन्।नातिचिरमहं thebetterindia.com-इति अन्तर्जालवाहिनीम् उल्लेखितवान्। यत्राहं डॉ.जयाचंद्रन्-महोदयस्य विषये अपठम्, तथा च, यदापि अवसरं लभेह्यहं तदावश्यं thebetterindia.com website इत्यत्र गत्वा एतादृशान् प्रेरकविषयान् ज्ञातुं प्रयते। प्रसन्नोह्यस्मि यत् अद्यत्वे एतादृश्योह्यनेकाः अन्तर्जालवाहिन्यो वर्तन्ते याः एतादृशानां विलक्षण-जनानां जीवन-प्रेरणायुताः अनेकविधाः कथाः अस्मान् सूचयन्ति। यथा thepositiveindia.com - इति वाहिनी समाजे रचनात्मकतां प्रसारयितुं समाज- ञ्चाधिकतरं संवेदनशीलं विधातुं सततं कार्यनिरता वर्तते । एवमेव yourstory. com इत्यत्र नवाचारवतां यूनाम् उद्यमिनाञ्च सफलता-वार्त्ताः कुशलतया वर्णिताः सन्ति। एवमेव samskritabharati.in-इत्यस्य माध्यमेन भवन्तः गृहे स्थित्वा सरलतया संस्कृतभाषां पठितुमर्हन्ति। किं वयं कार्यमेकं कर्तुं प्रभवेम-एतादृशीनां website-इत्यर्जालवाहिनीनां विषये परस्परं विनिमयं कर्तुं पारयेम ? सम्भूय वयं रचनात्मिकां प्रवृत्तिं प्रचारयेम ? विश्वसिमि यत् अमुना समुपायेन समधिकाः जनाः समाजस्य परिवर्तकानामस्मदीयानां नायकानां विषये अवगताः भविष्यन्ति। नकारात्मकतायाः प्रचारः अतितरां सरलो भवति, परञ्च, अस्माकं समाजे, अस्माकं परिपार्श्वे च अनेकानि भद्राणि शुभंकराणि च कार्याणि भवन्ति, तथा चैतत्सर्वं त्रिंशदुत्तरशत-कोटि-भारत- वासिनां सामूहिकप्रयासैरेव सञ्जायते।

प्रत्येकमपि समाजे क्रीडानां स्वकीयं महत्वं भवति। यदा वयं क्रीडामः तदा दर्शकाणामपि मनांसि ऊर्जा-सम्भृतानि भवन्ति। क्रीडकानां नामाभिज्ञान-सम्मानादयोह्यनेके विषयाः अस्माभिः अनुभूयन्ते। परञ्च, कदाचित्तु एतेषां पृष्ठभूमौ अनेकानि तथ्यानि तादृंशि भवन्ति यानि क्रीडा-विश्वादपि उच्चतराणि भवन्ति, अतितरां महत्त्वाधायीनि भवन्ति। अहं कश्मीर-कन्यकायाः हनायानिसार-इत्यस्याः विषये किमपि निवेदयितुकामोह्यस्मि या हि कोरिया-देशे karate-स्पर्धायां सुवर्ण-पदकं विजितवती। हनाया, द्वादश- वर्षीया वर्तते, कश्मीरस्य अनंतनाग-नाम्नि स्थले च निवसति। हनाया परिश्रमेण निष्ठया च karate-क्रीडाभ्यासमकरोत्, अस्याः क्रीडायाः सूक्ष्म-प्रविधीन् ज्ञातवती स्वयञ्च एतत् प्रमाणीकृतवती। अहं सर्वेषामपि देशवासिनां पक्षतः तस्याः उज्ज्वल-भविष्यत्-विषये शुभं कामये। हनाया-क्रीडिकायै भूयस्यः शुभकामनाः भूयान्सि चाशीर्वचान्सि। एवमेव षोडश-वर्षीयायाः पुत्रिकायाः रजन्याः विषये सञ्चार-माध्यमेषु भूयसी चर्चाभवत्। भवन्तोह्यपि कदाचित् नूनम् अवगतवन्तः। रजनी कनिष्ठमहिला-मुष्टामुष्टि-स्पर्धायां सुवर्णपदकं विजितवती। यथैव रजनीपदकं विजितवती, सा निकटवर्तिनं दुग्ध-मण्डपं गत्वा चषकपूरितं दुग्धं पीतवती। ततः परम्, रजनी निजपदकं वस्त्रेण संगोप्य निज-स्यूते स्थापितवती। साम्प्रतं भवन्तः विचारयन्तो भवेयुः यत् रजनीचषकपूरितंदुग्धं कथं पीतवती ? सा निजपितुः श्रीजसमेरसिंहस्य सम्माननार्थम् एवमाचरितवती, यो हि पानीपते एकस्य विपणपणौ तक्रं विक्रीणाति। रजनी असूचयत् यत् तस्याः पिताताम् एतावत्-स्थान-पर्यन्तं प्रापयितुम् अनेकविधं त्यागमाचरितवान्, अनेकानि च कष्टानि तेन सोढानि। जसमेरसिंहः प्रतिप्रातः रजन्याः तस्याश्च भगिनी-भ्रातृणां उत्थानात् प्रागेव निज-कार्यार्थं प्रयाति। रजनीयदा निज-पितरं Boxing-इति मुष्टामुष्टि-क्रीडां शिक्षितुं निजेच्छां निवेदितवती, तदा पितासर्वसम्भवं साधनम् उपायनीकृत्य तामुत्साहितवान्। रजनीमुष्टामुष्टि-क्रीडायाः अभ्यासं जीर्ण-हस्तकोषाभ्याम् आरभत यतो हि तेषु दिनेषु तस्याः कुटुम्बस्य आर्थिक-स्थितिः समीचीना नासीत्। सतीष्वपि एतासु अनेकविधासु बाधासु रजनी साहसं नैवात्यजत् तथा च, स्वीय-क्रीडाभ्यास-शिक्षणं संधारितवती। सा सर्बिया-देशेह्यपि पदकमेकं विजितवती। अहं रजन्यै शुभकामनाः आशीर्वादान् च ददामि, तथा च, रजन्याः सहयोगार्थं तस्याः उत्साह-वर्धनार्थं तस्याः पित्रोः, उषारानीजी-जसमेरसिंह-वर्ययोः वर्धापनं करोमि। मासेह्यस्मिन् पुणे-नगरीया विंशतिवर्षीया पुत्रिका वेदांगीकुलकर्णीद्विचक्रिकया विश्व-भ्रमण-कर्तृषु तीव्रतमगतियुता एशिया-क्षेत्रीया सिद्धा। सा ऊन-षष्ट्युत्तर-शत-दिनानि यावत् प्रतिदिनं प्रायेण त्रिशतं किलोमीटर-मितं द्विचक्रिकया प्रयाति स्म। भवन्तः कल्पयितुं शक्नुवन्ति-प्रतिदिनं त्रिशतंकिलोमीटर-मितंद्विचक्रिकयाप्रयाणम्! द्विचक्रि -कायाः प्रचालनंप्रति तस्याः दृढा निष्ठा नूनं प्रशंसनीयास्ति। किमेतादृशीः उपलब्धीः, एतादृशीं सिद्धिं चाकर्ण्य वयं प्रेरणां नैव लभेमहि ? विशेषेण मम युवमित्राणि, यदा वयमेतादृशीः घटनाः शृण्मः, तदा वयमपि सत्स्वपि काठिन्येषु किमपि उत्कृष्टं कर्तुं प्रेरणां लभेमहि। यदि संकल्पोह्यस्ति सामर्थ्य- युतः, साहसमस्ति अप्रतिहतम् चेत्तदा बाधाः स्वयमेव अवरुद्ध-गतिकाः भवन्ति। काठिन्यानि न कदाचिदपि बाधाः भवितुं प्रभवन्ति। अनेकानि एतादृन्शि उदाहरणानि,यदा शृण्मः तदा वयमपि निज-जीवने प्रतिपलमेकां नवीनां प्रेरणाम् अवाप्नुमः।

मम प्रियाः देशवासिनः, जान्युआरि-मासे हर्षोत्साह-भरितानि बहूनि पर्वाणि आगमिष्यन्ति यथा -लोहड़ी-पोंगल-मकरसंक्रान्ति-उत्तरायण-माघ-बिहू-माघी-प्रभृतीनि; एतेषां पर्वणामवसरेषु अशेष-भारते कुत्रचित् पारम्परिकनृत्यानां छटा, कुत्रचिच्च, शस्य-लवन-सज्जतायाः प्रसन्नतायां लोहड़ी ज्वालयिष्यते, कुत्रचित् नभसि विविध-वार्णिकाः कर्गद-पतत्रिणो डीयमानाः दरीद्रक्ष्यन्ते,अपरत्र च, कुत्रचित् मेलायोजनस्य शोभाः विवर्धिष्यन्ते, कुत्रचिच्च क्रीडा-स्पर्धाः भविष्यन्ति, तर्हि कुत्रचित् अन्योन्यं जनाः तिल-गुडकम् आस्वादयिष्यन्ति। जनाः परस्परं लोकभाषया कथयिष्यन्ति- 'तिलगुडघ्या-आणि,गोड़ - गोड़बोलाड़'

एतेषां सर्वेषां पर्वणां नामानि भवन्तु नाम पृथक्-पृथक् परञ्च सर्वेषामपि आयोजनस्य भावना एका एवास्ति। एते उत्सवाः येन केन प्रकारेण शस्येन कृषि-कर्मणा च संयुताः सन्ति, कृषकैः ग्रामैः कृषि-क्षेत्रैश्च संयुक्ताः वर्तन्ते। अस्मिन्नेवावसरे भगवान् भास्करः उत्तरायणः सन् मकरराशिं प्रविशति। एतत्परमेव दिनानि शनैः शनैः बृहत्तराणि जायन्ते, तथा च, शीतकालीनानां शस्यानां लवनमपि आरभते। अस्मदीयाः अन्नदातारः कृषकाः भगिनी-भ्रातरः अपि अभिनन्दनीयाः, तेभ्यः कोटिशो मङ्गल-कामनाः। 'विविधतायामेकता' - 'एकभारतम्श्रेष्ठभारतम्' इत्यस्याः भावनायाः सुगन्धिः अस्माकम् उत्सवेषु वरीवर्तते। वयमेतत् अनुभवितुं शक्नुमः यत् अस्मदीयाः उत्सवाः, प्रकृत्या साकं कियत्या घनिष्ठतया सम्पृक्ताः सन्ति। भारतीयसंस्कृतौ समाजःप्रकृतिश्च पृथक्-पृथक् नैव परिगण्यते

त्र व्यष्टिः समष्टिश्च एकैवास्ति। प्रकृत्या साकं अस्मदीय-घनिष्ठ-सम्बन्धानां शोभनमुदाहरणमस्ति ङ्कउत्सवाधृतं पञ्चाङ्गम्। अस्मिन् सम्पूर्णस्य वत्सरस्य उत्सवाः पर्वाणि च, उत्सवैश्च साकमेव ग्रहनक्षत्राणां विवरणमपि भवति। अमुना पारम्परिकेण पञ्चाङ्गेन अवगन्तुं शक्यते यत् प्राकृतिकाभिः खगोलीयाभिश्चघटनाभिः साकं अस्मदीयः सम्बन्धः कियान् पुरातनोह्यस्ति। सूर्य-चन्द्रमसोः गत्याधृतं, चन्द्र-सूर्ययोः पञ्चाङ्गानुसारं पर्वणाम् उत्सवानाञ्च तिथि-निर्धारणं भवति। इदन्तु एतस्मिन् निर्भरं यत् कः कस्मिन् पञ्चान्गे विश्वसिति। कतिपयेषु क्षेत्रेषु ग्रहनक्षत्राणां स्थित्यनु- सारमपि पर्वाणि, उत्सवाश्च आमान्यन्ते। गुड़ीपड़वा-चेटीचंड-उगादि-इत्यादयः एकत्र चन्द्र-पञ्चाङ्गानुसारं आमान्यन्ते, अपरत्र तमिलपुथांडु-विषु-वैशाख-बैसाखी-पोइला-बैसाख-बिहु-प्रभृतीनि पर्वाणि सूर्य-पञ्चाङ्गानुसारम् आयोज्यन्ते। अस्मदीयेषु अनेकेषु उत्सवेषु नदीनां जलानाञ्च संरक्षणस्य भावः विशिष्टरूपेण समाहितोह्यस्ति। छठपर्व-नदीषु, तडागेषु च, सूर्यस्य उपासनया संयुतमस्ति । मकर-संक्रान्त्यवसरेह्यपि कोटिशो जनाःपवित्रनदीषु पुण्यावगाहनम् आचरन्ति ।अस्मदीयाः उत्सवाः,सामाजिकमूल्य-विषयेह्यपि अस्मान् शिक्षयन्ति। एकत्र एतेषां पौराणिकमहत्वमस्ति, अपरत्र च, प्रत्येकमपि पर्व, उत्सवश्च जीवनपाठं शिक्षयति -अन्योन्यञ्च भ्रातृभावेन स्थातुं सुतरां सहजतया प्रेरयति। अहं भवद्भ्यः सर्वेभ्यः नवदशोत्तर-विंशतिशततमवर्षस्य कृते कोटिशः शुभकामनाः व्याहरामि, तथा च, आगम्यमानानाम् उत्सवानाम् आनन्द-सन्दोहम् अनुभवन्तु - एतदर्थञ्च सर्वविधं शुभं कामये। एतेषु उत्सवेषु आदत्तानां चित्राणि भवन्तः सर्वैः साकं संविभाजयन्तु येन हि भारतस्य विविधतायाः भारतीयसंस्कृतेश्च सुन्दरतां प्रत्येकमपि जनः अवलोकयितुं शक्नुयात्।

मम प्रियाः देशवासिनः, अस्मदीय-संस्कृतौ अनेकानि तादृन्शि तथ्यानि सन्ति, येषां विषये वयं गौरवमनुभवितुं शक्नुमः, तथा च, साभिमानं अशेषविश्वं प्रदर्शयितुं शक्नुमः - तेषु अन्यतममस्ति - कुम्भ-मेला। भवन्तः कुम्भमेलाविषये स्यात् बहुविधं श्रुतवन्तः स्युः। चलचित्रेष्वपि कुम्भ-मेलायाः भव्यतायाः विशालतायाश्च विषये पर्याप्तं दृष्टं स्यात्, एतत् सत्यमपि वर्तते। कुम्भमेलायाः स्वरूपंविराट्वर्तते - यावद्दिव्यं तावदेव भव्यम्। देशस्य अशेष-विश्वस्य च जनाः अत्रायान्ति तथा च, कुम्भ-मेलकेन संयुताः भवन्ति। कुम्भ-मेलायाम् आस्थाश्रद्धयोः जन-सागरः समुद्वेल्लति। युगपदेव एकस्मिन्नेव स्थले देश-विदेशेभ्यः समायाताः लक्षशः कोटिशो जनाः समवेताः भवन्ति। कुम्भपरम्परा हि अस्मदीयस्य महतः सांस्कृतिक-रिक्थस्य सूत्रेण पुष्पिता पल्लविता चाभवत्। ऐषमः क्रमे जान्युआरि-मासे पञ्चदश-दिनाङ्कतः तीर्थराजे प्रयागे विश्वप्रसिद्धा कुम्भमेला आयोज्यमानास्ति यस्याः विषये कदाचित् भवन्तोह्यपि सर्वे सौत्सुक्यं प्रतीक्षन्ते। कुम्भमेलायाः कृते सद्यः आरभ्य महात्मनः सन्तः साधवश्च तत्रागन्तुमारभन्त। अस्य कुम्भ-मेलकस्य वैश्विकमहत्वविषये अमुनैव तथ्येन अनुमातुं शक्यते यत् विगते वर्षे NESCO-इत्यनेन Intangible Cultural Heritage of Humanity-इत्याख्यायां मानवतायाः दुष्प्रधर्ष-सांस्कृतिक-रिक्थ-सूच्यां एतत् चिन्हितमस्ति। कतिपय-दिनेभ्यः प्राक् बहूनां देशानां राजदूताः कुम्भमेलकस्य पूर्व-सज्जताः अवालोक- यन्। तत्र युगपदेव बहूनां देशानां राष्ट्रध्वजाः उत्तोलिताः। प्रयागराजे आयोज्य-मानेह्यस्मिन् कुम्भमेलके सार्धैक-शत-देशेभ्योह्यपि अधिकतरेभ्योदेशभ्यो जनाः समागमिष्यन्तीति सम्भाव्यते । कुम्भमेलकस्य दिव्यतया भारतस्य भव्यता अशेष-जगति निजामाभां विकिरिष्यति । कुम्भमेला self-discovery-इत्यात्मा- न्वेषणस्यापि बृहत्तमं माध्यमं वर्तते, यत्रागम्यमानाः सर्वेह्यपि पृथक्-पृथक्-अनुभूतिं सन्धारयन्ति। सांसारिक-वस्तूनि आध्यात्मिक-दृष्ट्या पश्यन्ति अवगच्छन्ति च। विशेषेण यूनां कृते अयं हि बृहत्तमः शिक्षणानुभवः भवितुं शक्नोति। अहं स्वयमपि कतिपय-दिनेभ्यः प्राक् प्रयागराजमगच्छम्। मया दृष्टं यत् कुम्भमेलकस्य पूर्वोपकल्पनानि महता रंहसा प्रवर्तन्ते। प्रयागराजस्य नागरिकाः अपि कुम्भ-मेलाविषये अतितरां उत्साहिनो वर्तन्ते। तत्राहं Integrated Command & Control Centre-इत्याख्यस्य केन्द्रस्य लोकार्पणं विहितवान्। श्रद्धालवोह्यमुना महत्-साहाय्यम् अवाप्स्यन्ति। ऐषमः क्रमे कुम्भ-मेलके स्वच्छता-विषयोह्यपि सबलं प्रतिपाद्यते। आयोजने श्रद्धया साकमेव स्वच्छतापि स्थास्यति चेत्, अस्य समीचीन-सन्देशोह्यपि सुदूरं यावत् प्रयास्यति। ऐषमः क्रमे प्रत्येकमपि श्रद्धालुः त्रिवेणी-सङ्गमे पवित्र-स्नानानन्तरम् अक्षयवटस्य पुण्यदर्शनमपि कर्तुं शक्ष्यति। जनानाम्आस्थाप्रतीकरूपोह्ययम् अक्षयवटः सहस्रेभ्योह्यप्यधिकवर्षेभ्यः दुर्गे पिहितः आसीत्, येन श्रद्धालवः अभिलषन्तोह्यपि अस्य दर्शनं कर्तुं नैव शक्नुवन्ति स्म। साम्प्रतं अक्षयवटस्य द्वारं सर्वेषामपि कृते उद्घाटितं स्थास्यति। ममायम् आग्रहः भवतां सर्वेषां कृते यत् यदा भवन्तः कुम्भमेलकं गच्छेयुः, तदा कुम्भ- मेलायाः नाना-पक्षान् चित्राणि च सामाजिक-सञ्चारमाध्यमेषु नूनं सम्विभाज- येयुः येन अधिकाधिकाः जनाः कुम्भमेलकं समागन्तुं प्रेरिताः भवेयुः।

अध्यात्मस्य अयं कुम्भः भारतीयदर्शनस्य महाकुम्भः स्यात्।
आस्थायाः कुम्भोह्ययं राष्ट्रियतायाः अपि महाकुम्भः भवेत्।
राष्ट्रियैकतायाः अपि महाकुम्भः भवेत्।
श्रद्धालूनामयं कुम्भो वैश्विक-पर्यटकानामपि महाकुम्भः स्यात्।
कलात्मकतायाः अयं कुम्भः,सृजन-शक्तीनामपि महाकुम्भो भवेत्।

मम प्रियाः देशवासिनः,जान्युआरि-मासे षड्विंशे दिने सम्पत्स्य-मानं गणतन्त्रदिवससमारोहं वयं देशवासिनः अतितराम् उत्सुकतापूर्वकं प्रतीक्षामहे। तस्मिन् दिने वयं अस्मदीयानां महतीनां विभूतीनां स्मरणं कुर्मः, ये हि अस्मभ्यं संविधानं प्रादुः।

वर्षेह्यस्मिन् वयं पूज्यबापूवर्यस्य सार्धशती-जयन्तीवर्षमायोजयामः। अस्मदीयमिदं सौभाग्यं यत् दक्षिण-अफ्रीका-राष्ट्रपतिःश्रीसिरिल-रामाफोसा, ऐषमः गणतन्त्र-दिवसे मुख्यातिथिपदम् अलङ्कर्तुं भारतमागमिष्यति। पूज्यबापू-वर्यस्य दक्षिण-अफ्रीकादेशस्य च मध्ये अभेद्यः सम्बन्धोह्यवर्तत। अयं दक्षिण-अफ्रीका-देशः एवासीत्, यत्र मोहनः, 'महात्मा' सञ्जातः। दक्षिण-अफ्रीकादेशे एव महात्मगान्धी नैजं प्रथमं सत्याग्रहमारभत तथा च, रङ्ग-भेदं विरुद्ध्य दृढतया संघर्षमकरोत्। सः फीनिक्स्-टॉलस्टॉय-फार्म्स्-इत्यनयोः अपि स्थापनामकरोत्, यतः एव कृत्स्नेह्यपि जगति शान्तिन्याययोः प्रतिस्वरो मुखरायितः। अष्टादशोत्तर-द्विसहस्रतमं वर्षमिदं नेल्सन-मंडेलाजन्मशताब्दी-वर्षरूपेणापि आमान्यते। असौ 'मड़ीबा'-इत्यभिधानेनापि अभिज्ञायते। वयं सर्वेह्यपि जानीमः यत् नेल्सनमंडेला अशेष-जगति जातिभेदं विरुध्य विधीयमान -स्य संघर्षस्य उदाहरणत्वेन अवर्तत, तथा च, मंडेला-महोदयस्य प्रेरणास्रोत- स्त्वेन कः आसीत्? एतावन्ति वर्षाणि यावत्कारावासे स्थातुं अपेक्षितासहनशक्तिः प्रेरणा च पूज्यबापू-वर्यादेव तेनाधिगतासीत् । मंडेलामहोदयः बापू-वर्यं प्रति अकथयत् - 'महात्माअस्मदीयेतिहासस्य अभिन्नाङ्गत्वेन अस्ति यतो हि अत्रैव असौ सत्येन साकं स्वीयं प्रथमं प्रयोगं व्यदधात्; अत्रैवासौ न्यायं प्रतिनिज-दृढतायाः विलक्षणप्रदर्शनमकरोत्; अत्रैवासौ स्वीय-सत्याग्रहस्य दर्शनस्य संघर्षस्य च प्रणालीं विकासितवान्।'

सः बापू-वर्यं निजादर्शरूपेण स्वीकरोति स्म । बापू-वर्यः मंडेला च, अशेष-विश्वस्य कृते न केवलंप्रेरणास्रोतस्त्वेन वर्तेते, परञ्च अनयोः आदर्शाः प्रेमकरुणायुतस्यसमाजस्य निर्माणार्थमपि सदैवप्रोत्साहयन्ति।

मम प्रियाः देशवासिनः, कतिपयेभ्यो दिनेभ्यः प्राक् गुजराते नर्मदातटे केवड़िया-क्षेत्रे DGP conference -इति संगोष्ठी सम्पन्ना, यत्र जगतः उच्छ्रिततमा प्रतिमा'Statue of Unity'- वर्तते, तत्र देशस्य शीर्ष-रक्षिकर्मिभिः साकं सार्थकीचर्चा जाता। देशस्य देशवासिनाञ्च सुरक्षां दृढतरां विधातुं के के समुपायाः विधेयाः, इति कृत्वा विस्तरेण चर्चितम्। तस्मिन्नवधौ अहं राष्ट्रियैकतायै 'सरदारपटेल-पुरस्कारम्' आरब्धुमपि उद्घोषितवान्। पुरस्कारोह्ययं तस्मै जनाय प्रदास्यते, येन केनापि प्रकारेण राष्ट्रियैकतायै नैजं योगदानमर्पितम्। सरदारपटेलः नैजं पूर्णमपि जीवनंदेशस्यएकतायै समर्पितवान्। सः सर्वदा भारतस्य अखण्डताम् अक्षुण्णां सन्धारयितुं संलग्नः आसीत्। सरदार-महोदयः आमिनोति स्म यत् भारतस्य शक्तिः अत्रत्यासु विविधतासु एव सन्निहितास्ति। सरदारपटेल-महोदयस्य तस्याः भावनायाः सम्माननार्थं एकतायाः अस्य पुरस्कारस्य माध्यमेन तस्मै श्रद्धाञ्जलिमर्पयामः।

मम प्रियाः देशवासिनः, जान्युआरि-मासे त्रयोदशे दिनाङ्के गुरोः गोबिन्दसिंहस्य जयन्त्याः पावनपर्व वर्तते। गुरोः गोबिन्दसिंहस्य जन्मपटना-नगर्यामभवत्। जीवनस्य अधिकतर-कालार्थं तस्य कर्मभूमिः उत्तरभारतमेवा- सीत्, तथा च, महाराष्ट्रस्य नांदे?-स्थलेह्यसौ स्वीय-प्राणान् अत्यजत्। जन्मभूमिःपटना, कर्मभूमिःउत्तरभारतम् तथा च,जीवनस्य अन्तिमक्षणं नांदे?-क्षेत्रमासीत्। आपाततो वक्तुं शक्यते यत् सम्पूर्णस्यापि भारतवर्षस्य आशीर्वादास्तेनप्राप्यन्ते। तस्य जीवन-कालं परिशीलेम चेत् तत्र सम्पूर्णस्यापि भारतस्य छविः प्राप्यते। निज-पितरिश्रीगुरुतेगबहादुरे हुतात्मनि सञ्जाते सति श्रीगुरुगोबिंदसिंहः नव-वर्षात्मके अल्पायुषि गुरुपदमधिगतवान्। गुरुः गोबिन्दसिंहः न्यायस्य युद्ध-हेतोः अपेक्षित-साहसं सिखगुरुभ्यः रिक्थरूपेण अवाप्नोत्। सः शान्तसरल-व्यक्तित्वयुतः आसीत्, परञ्च यदा यदा, निर्धनानां दुर्बलानाञ्च स्वरं दमयितुं प्रयतितम्, तान् प्रति अन्यायपूर्णं व्यवहृतं वा, तदा-तदा गुरुः गोबिन्दसिंहः निर्धनानांदुर्बलानाञ्चकृते निज-निनादं दृढतयाउच्चारितवान्,अत एवोच्यते-'सवालाखसेएकलड़ाऊँ, चिड़ियोंसोंमैंबाजतुड़ाऊँ, तबेगोबिंदसिंहनामकहाऊँ।

सः कथयति स्म यत् दुर्बलवर्गैः साकं युद्धं विधाय शक्तेः प्रदर्शनं न मनागपि उचितम्। श्रीगोबिन्दसिंहः आमिनोति स्म यत् सर्वातिशायिनी सेवा-मानवीयदुःखानामपसारणमेवास्ति। सः वीरता-शौर्य-त्याग-धर्मपरायणता-समन्वितो दिव्य-पुरुषः आसीत्, येन शस्त्रस्य शास्त्रस्य च अलौकिक-ज्ञानं सन्धार्यते स्म। सः धनुर्धरः सन् विलक्षणः लक्ष्यवेधी त्वासीदेव, युगपदेव गुरुमुखी-ब्रजभाषा-संस्कृत-फारसी-हिन्दी-उर्दू-सहितानां अनेकासां भाषाणामपि ज्ञातासीत्। अहं पुनरेकवारं श्रीगुरुगोबिन्दसिंहाय प्रणमामि।

मम प्रियाः देशवासिनः,देशे अनेकानि एतादृन्शि समीचीनानि प्रकरणानि संजायन्ते, येषां व्यापिनी चर्चा नैव भवति, एतादृशः एव अनुपमः प्रयासः F.S.S.A.I. अर्थात् Food Safety and Standard Authority of India-इत्यनेन विधीयते। महात्मगान्धिनः सार्धशती-जयन्ती-वर्षमुपलक्ष्य कृत्स्नेह्यपि देशे अनेके कार्यक्रमाःआयोज्यन्ते। अस्यामेव शृङ्खलायांF.S.S.A.I.-इति प्राधिकरणम्, सुरक्षित-स्वास्थ्यकर-खाद्याभ्यासं प्रोत्साहयितुं सततं प्रयतते। 'Eat Right India' इत्यभियानस्य अन्तर्गतं सम्पूर्णेह्यपि देशे स्वस्थभारतयात्राः आयोज्यन्ते। अभियानमिदं जान्युआरि-मासस्य सप्त-विंश-दिनं यावत् प्रचलिष्यति। कदाचित्तु शासनिक-संघटनानां परिचयः नियन्त्रकत्वेन भवति परञ्च एतत्तु नितरां प्रशंसनीयं यत् F.S.S.A.I-इत्यधिकरणम्, इतोह्यप्यग्रे गत्वा जन-जागृतेः लोकशिक्षायाश्च कार्याणि विदधाति। यदाभारतं स्वच्छं भविष्यति, स्वस्थं स्थास्यति, तदैव भारतंसमृद्धमपि भविष्यति। समीचीन-स्वास्थ्यस्य कृते सर्वाधिकम् आवश्यकमस्ति-पौष्टिकभोजनम्। सन्दर्भेह्यस्मिन्, अस्य प्राथमिक-प्रयासस्य कृते F.S.S.A.I-इत्यभिकरणं हृदयेन अभिनन्दामि। ममायम् आग्रहः, आगच्छन्तु अमुना प्राथमिक-प्रयासेन आत्मानं संयोजयेम। भवन्तोह्यपि अत्र सहभागित्वं स्वीकुर्युः, तथा च, विशेषेण साग्रहं वदामि यत् बालकेभ्यो नूनं एतानि वस्तूनि अवश्यं प्रदर्शयेयुः। खाद्याभ्यासस्य महत्वशिक्षणं बाल्यकालादेव परमावश्यकम्।

मम प्रियाः देशवाशिनः, एतद्-वर्षस्यायं अन्तिम-कार्यक्रमः,ऊनविंशोत्तर-द्विसहस्रतमे वर्षे वयं पुनः मेलिष्यामः, पुनः मनोगतं प्रकटयिष्यामः। व्यक्तिजीवनं भवेत् वा राष्ट्रजीवनम्, आहोस्वित् भवतु नाम समाजजीवनम्, प्रेरणा भवति, प्रगतेः आधारः। आगच्छन्तु, नवीना प्रेरणा, नूतनोत्साहः, अभिनवः संकल्पः, नवीना सिद्धिः, नवा उन्नतिः-अग्रेसरेम, सततं प्रचलेम, आत्मानं परिवर्तयेम, देशमपि परिवर्तयेम। भूयान्सो धन्यवादाः।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

# लघुसमाचारपत्राणां विश्वसनीयता-आह्वान विषये संगोष्ठी

नवदेहली। राष्ट्रियराजधानी क्षेत्र देहल्यां कार्यरत श्रमजीवी पत्रकार एवं लघु समाचारपत्राणां ''दिल्लीमिडियाएशोसिऐशन'' माध्यमेन् गाँधीशान्तिप्रतिष्ठानस्य सभागारे लघुसमाचारपत्राणां विश्वसनीयता एवं आह्वाहन विषये संगोष्ठी अभवत्। संगोष्ठ्याः शुभारम्यः अतिथि दीपप्रज्वालनेन कृतवान। दिल्ली मिडिया एशोसियेशनस्याध्यक्ष श्रीवेदप्रकाशशर्मा एवं महासचिव श्रीविनोदजोशी संगोष्ठ्या अध्यक्ष पद्मश्रीरमाकान्त शुक्ल, मुख्यातिथि वरिष्ठ पत्रकार श्रीउमेशजोशी व विशिष्टातिथि




राष्ट्रनिर्माणपार्टी अध्यक्ष ठाकुरविक्रमसिंह एवं आर.टी.आई एक्टिविष्ट श्रीहरपालसिंहराणा महोदयस्य स्वागतं पुष्पमाला, स्मृति चिन्ह एवं वस्त्रेण् कृतवन्तौ। स्व स्वागतभाषणे श्रीवेदप्रकाशशर्मा मंञ्चासीन जानानां परिचयेन सह संगोष्ठ्याः विषय एवं उद्येशस्य विषये उक्त्वा उक्तवान यत् लोकतन्त्रस्य चतुर्थ स्तम्भ पत्रकारिता स्व अस्तित्वस्य रक्षणार्थं संघर्षः करोति। सर्वकारः पत्रकारिता विरोधि नीतेः निर्माणं करोति। अनेन राष्ट्रनिर्माण एवं समाजिकोत्थाने संलग्न समाचारपत्रस्य स्थिति दयनीयोऽस्ति।

जनसत्ता एवं अन्य समाचारे कार्यरत मुख्यातिथि देशे लोकतंत्राय समाचारपत्रस्य महत्ता विषये उक्तवान यत् समाचारपत्र निःस्वार्थ भावेन सर्वां समस्यां प्रदर्शयति। समाजिकोत्थाने अस्य विशेष महत्वमस्ति। अतः अस्य संरक्षणार्थं विशेष नीतेः आवश्यकता अस्ति।

दिल्ली सर्वकारस्य पूर्वमंत्री कपिलमिश्रा उक्तवान केन्द्र व दिल्ली सर्वकार लघुसमाचारपत्रान् विज्ञापनस्य माध्यमेन आर्थिक सहायतानां प्रतिबन्धस्य निन्दा कृतवान। समाचारपत्र सर्वथा सत्योद्घाटनं करोति अनया समाचारपत्र उपेक्षायाः विषयो जातः। एवं संघर्षे अहममि अस्मि इति आश्वासनं दत्तवान। विशिष्टातिथि श्रीसिंहः लघु समाचारपत्रान् पत्रकारितायाः वास्तविकदूत उक्तवान। सः उक्तवान अस्यान्तः राष्ट्रहिते नास्ति। राजनैतिक जनाः स्वहिताय अस्योपयोगं कुर्वन्ति। अतः आर्थिक संरक्षणं दातव्यम्।

लखानऊतः समागत वरिष्ठपत्राकार एवं सामाजिक विश्लेषक श्रीकृष्णकान्त वत्स उक्तवान यत् देशे पत्रकारिता समर्थोऽस्ति तस्य श्रेय लघुसमाचारपत्रं गच्छति। सः उक्तवान् यत् वृहत् समाचारपत्रस्य सम्पादक राजनैतिक जनानां कृते कार्यं करोति परञ्च लघु समाचारपत्रस्य सम्पादक सत्यस्य पथे गत्वा कार्यंकरोति।

कार्यक्रमस्य अध्यक्षता समये श्रीशुक्लः उक्तवान् यत् स्वतन्त्रता प्राप्यात्पूर्वं पत्रकारितायाः भूमिकां रेखांकितं कृत्वा उक्तवान यत् स्थानीयस्तरे प्रकाशित समाचारपत्राणां प्रकाशनं कठिन कार्यमस्ति। सर्वकारान् विज्ञापनस्य रूपे आर्थिक सहायता दत्वा एतस्य संरक्षणं कर्तव्यम्।

संगोष्ठीं राष्ट्र किंकर साप्ताहिकस्य सम्पादक श्रीविनोदबब्बर, ए.टू.जेड समाचारस्य विशेष सम्वाददाता श्रीहीरेन्द्र राठौर, आर.टी.आई एक्टिविष्ट श्रीहरपालसिंहराणा, डा.ए.वी.पी.तः आगत श्रीगोपालराय, इण्डियन पीस टाइम्स इत्यस्य सम्पादक डॉ. रमेशकुमारपासी स्व वक्तव्यं दत्तवन्तः।

अस्मिन्नवसरे सर्वं स्मृतिचिन्हनं एवं अंगवस्त्रं दत्तवान। एवं सामाजिक कार्यकर्तानामपि स्वागतं कृतवान। एवं मुख्यातिथि डी.एम.ए. इत्यस्य सदस्यानां एवं पदाधिकारिनां सम्मानं कृतवान।

कार्यक्रमस्यान्ते महासचिव श्रीविनोदजोशी अतिथिजनानां एवं उपस्थित पत्रकाराणां धन्यवादं कृत्वा देहल्यां प्रचल्यमान समाचारपत्राणां सर्वांगीन विकास विषये उक्तवान। एवं सर्वं मिलित्वा समस्यायाः समाधान करणाय उक्तवान।

# महर्षिवर्याणां श्रीजगदीशनारायणब्रह्मचारिमहोदयानामष्टमपुण्यस्मृतिः समनुष्ठिता

**श्रीजगदीशवेदोद्यानसौरभम्** इत्यनया संज्ञया संगठितेनैकेन समूहेन बिहारप्रान्तस्थ द्वारबंगमण्डलान्तर्गते लगमाग्रामे जगदीशनारायणब्रह्मचर्याश्रमस्यान्यासाञ्च चतसृणां शिक्षणसंस्थानानां संस्थपकानां साकेतसञ्चारिणाम्महर्षि- वर्याणामष्टमपुण्यस्मृतौ पौषकृष्णचतुर्थ्यां बुधवासरे तदनुसारं 26-12-2018 तमे दिनाङ्के तच्छिष्यैः कटवारियासरायस्थिते पञ्चायतभवने समनुष्ठितं वेदमन्त्रोच्चारण-श्लोकोच्चारण-भाषणादिप्रतियोगिताभिस्साकं विशालभण्डारारूपं कार्यक्रममिति।

कार्यक्रमेऽस्मिन् मुख्यातिथित्वेन समाहूता आसन् राज्ट्रियसंस्कृतसंस्थानस्य पूर्वनिदेशकाः श्रीमन्तः




डॉ. कमलाकान्तमिश्रमहोदयाः। सारस्वतातिथित्वेन श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शिक्षाशास्त्रसङ्कायस्य पूर्वसङ्कायप्रमुखाः पूर्वविभागाध्यक्षाश्च प्रो.नागेन्द्रझामहोदयाः, पौरोहित्यविभागस्य पूर्वविभागाध्यक्षाः प्रो. रामराज उपाध्यायाश्च, विशिष्टातितिथयः डॉ.ललनकुमारझाः दिल्लीसर्वकारस्य शिक्षानिदेशालयस्य उपनिदेशकाः समुपस्थिता आसन्। तिसृषु प्रतियोगितासु निर्णायकत्वेन श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागाध्यक्षाः प्रो. गोपालप्रसादशर्माणः, वेदविभागीयाचार्याः डॉ. रामानुज उपाध्यायाः, नव्यन्यायविभागीयाचार्याः प्रो. महानन्दझावर्याश्चासन्। सर्वास्वपि प्रतियोगितासु आहत्य पञ्चविंशतिः प्रतिस्पर्द्धिनः समुपस्थाय सोत्साहं भागं गृहीतवन्तः।

कार्यक्रमस्यास्य शुभारम्भः समागतैरतिथिभिर्दीपप्रज्वालनेन, गौतममिश्रस्य वैदिकेन मङ्गलाचरणेन ष्शिवानी कुमार्याः पौराणिकेन मङ्गलाचरणेन च सञ्जातः। अतिथीनां पुज़्पमाल्यार्पणेन प्रावारकेण च स्वागतानन्तरं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य वेदविभागीयाचार्येण विद्यावाचस्पतिना डॉ. सुन्दरनारायणझाचर्येण समागतानामतिथीनां वाचिकस्वागतपूर्वकं महाराजजीनां मिथिलायां वेदस्य प्रचार-प्रसारे बहुमूल्यं योगदानमस्तीति प्रवचनविधिना विज़यप्रवर्तनं विहितम्। तदनन्तरं सर्वप्रथमं वेदमन्त्रोच्चारणप्रतियोगिता समारब्धा। तत्र विद्यापीठीयाष्ठछात्राः पङ्कजशर्मा प्रथमस्थाने, पुष्पेन्द्ररावतः द्वितीयस्थाने, त्रिपुरारिझा तृतीयस्थाने च चिताः। श्लोकोच्चारणप्रतियोगितायां गोपालजीमिश्रः प्रथमस्थाने, आनन्दकुमारझा द्वितीयस्थाने शिवानी कुमारी तृतीयस्थाने च चिताः। भाज़णप्रतियोगितायां दिल्ली विष्ठवविद्यालयस्य छात्रः विभवझा प्रथमस्थाने, विद्यापीठीयश्छात्रः आनन्दकुमारझा द्वितीयस्थाने, गौतममिश्रः तृतीयस्थाने, सुभाषकुमारमिश्रष्ठच सान्त्वनापुरस्काराय चिताः। प्रतियोगिता समाप्त्यनन्तरं महाराजजीनां शिष्यवर्गैः स्वीयं-स्वीयमनुभवं प्रस्तुतम्। तत्र राजस्थानप्रदेष्ठास्य अलवरमण्डलस्थितस्य संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. यशस्पतिझामहोदयः, कर्मकाण्डनिज़्णातः पं श्रीचिरञ्जीवमिश्रः, पं. श्रीरामाकान्तझा, यज्ञाचार्यः पं. श्रीउदयनाथझा, श्रीलालबहादुरशास्त्रीराष्ट्रिय- संस्कृतविद्यापीठस्य ज्योतिज़विभागीयाचार्यः डॉ. फणीन्द्रकुमारचौधरिवर्यः, एल.आइ.सी.कार्यालये प्रसिद्धः कार्यकर्ता श्रीविद्याशङ्करझामहोदयश्च हृदयोद्गारं प्रस्तुतवन्तः। तदनन्तरमतिथीनामुद्बोधनं मुख्यातिथेरुद्बोधनञ्चाभवत्। सम्मानितैरतिथिभिः महाराजजीनां विषये बहुश्रुतानि वचनानि व्यक्तीकृतानि। प्राच्यविद्यायाः प्रचार-प्रसाराय कृतप्रयत्नस्य परमेशावतारस्य परमहंसस्वरूपस्य ब्रह्मचारिमहोदयस्य कीर्तिकौमुदीं संस्मृत्य संस्मृत्य सर्वेऽप्यतिथयः तस्याकारणकरुणावरुणालयस्य माहात्म्यं गीतवन्तः। तत्पष्ठचात् संस्कृताध्यापकेन डॉ. कृष्णकान्तठक्कुरेण धन्यवादज्ञापनं कृतम्। अन्ते शान्तिपाठेन सामूहिकेन भण्डाराप्रसादग्रहणेन च कार्यक्रमः सम्पन्नोऽभवत्। इति शम् ।

अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दकुमारतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः *sanskritsamvad@gmail.com*, *RNI No. : DELSAN/2011/38660* *DL(E)-20/5534/2018-20* राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।